# RAJA N L KHAN WOMEN'S COLLEGE (AUTONOMOUS)

# GOPE PALACE, MIDNAPORE – 721102

**Description of module:**

| | |
|---|---|
| Department | Sanskrit (UG & PG) |
| Subject | Sanskrit |
| Year & Semester | PG 1st Year & 2nd Sem |
| Paper Name & Code | Grammar & SAN-202 |
| Unit Name | Siddhāntakaumudī- Ajantapuṃliṅga |
| Module Name | सर्वनाम |
| Content Writer | Srimanta Bhadra<br>Asst. Professor, RNLKWC |

RNLKWC

# सर्वनाम

## १. प्रस्तावना

अकारान्तपुंलिङ्गरामशब्दं पठितवान्। अस्मिन् पाठे सर्वेषां नाम्नः बोधकं सर्वनामशब्दं पठिष्यति। तत्र केचन सर्वनामशब्दाः अजन्ताः (अच् अर्थात् स्वरवर्णः अन्ते येषां), केचन हलन्ताः (हल् अर्थात् व्यञ्जनवर्णः अन्ते येषां) वर्तन्ते। पुंलिङ्गं, स्त्रीलिङ्गं, नपुंसकलिङ्गम् इति त्रिविधम् लिङ्गम्। ततः अजन्तपुंलिङ्गसर्वनामानि, अजन्तस्त्रीलिङ्गसर्वनामानि, अजन्तनपुंसकलिङ्गसर्वनामानि, हलन्तपुंलिङ्गसर्वनामानि, हलन्तस्त्रीलिङ्गसर्वनामानि, हलन्तनपुंसकलिङ्गसर्वनामानि इति षड्विधेषु सर्वनामसु अजन्तपुंलिङ्गसर्वनामशब्दानां पर्यालोचनम् अत्र क्रियते। अजन्तपुंलिङ्गेषु अपि अकारान्तस्य सर्वशब्दस्यैव अत्र चर्चा वैयाकरणसिद्धान्तकौमुदीदिशा विधीयते।

## २. उद्देश्यानि

अमुं पाठं पठित्वा त्वं–

- सर्वनामस्वरूपं ज्ञास्यसि।
- संस्कृते केषां सर्वनामसंज्ञा इति ज्ञास्यसि।
- सर्वशब्दस्य साधनप्रक्रियां ज्ञास्यसि।
- लघुसूत्रस्य अर्थः कथं महान् भवति इति ज्ञातुं शक्ष्यसि।
- सूत्रव्याख्यानकौशलं ज्ञास्यसि।

## ३. मूलपाठः

### सिद्धान्तकौमुदीपाठः–

**॥सर्वादीनि सर्वनामानि (१.१.२७)॥ सर्वादीनि शब्दस्वरूपाणि सर्वनामसंज्ञानि स्युः। 'तदन्तस्यापीयं संज्ञा' 'द्वन्द्वे च' (सू. २२२) इति ज्ञापकात्। तेन 'परमसर्वत्र' इति त्रल् 'परमभवकान्' इत्यत्राकच्च सिध्यति।**

RNLKWC

**॥जसः शी (७.१.१७)॥ अदन्तात्सर्वनाम्नः परस्य जसः शी स्यात्। अनेकाल्त्वात्सर्वादेशः। न च 'अर्वणस्तृ-' (सू. ३६४) इत्यादाविव 'नानुबन्धकृतमनेकाल्त्वम्' (प. ६) इति वाच्यम्। सर्वादेशत्वात् प्राग् इत्संज्ञाया एवाभावात्। सर्वे।**

**॥सर्वनाम्नः स्मैः (७.१.१४)॥ अतस्सर्वनाम्नो ङे इत्यस्य स्मै स्यात्। सर्वस्मै।**

**॥ङसिङ्योः स्मात्स्मिनौ (७.१.१५)॥ अतः सर्वनाम्न एतयोरेतौ स्तः। सर्वस्मात्।**

**॥आमि सर्वनाम्नः सुट् (७.१.५२)॥ अवर्णान्तात्परस्य सर्वनाम्नो विहितस्यामः सुडागमः स्यात्। एत्वषत्वे। सर्वेषाम्। सर्वस्मिन्। शेषं रामवत्।**

---

## ४. साम्प्रतं मूलपाठम् अवगच्छामः

**४.१. सर्वादीनि सर्वनामानि (१.१.२७)**

**सर्वादीनि शब्दस्वरूपाणि सर्वनामसंज्ञानि स्युः। 'तदन्तस्यापीयं संज्ञा' 'द्वन्द्वे च' (सू. २२२) इति ज्ञापकात्। तेन 'परमसर्वत्र' इति त्रल् 'परमभवकान्' इत्यत्राकच्च सिध्यति।**

**भूमिका–** वैयाकरणमूर्धन्येन भट्टोजिदीक्षितेन विरचिताया वैयाकरणसिद्धान्तकौमुद्याः अजन्तपुंलिङ्गप्रकरणे सूत्रमिदं वर्तते। षड्प्रकारकेषु सूत्रेषु इदं संज्ञासूत्रम्। अनेन सूत्रेण सर्वनामसंज्ञा विधीयते।

**सूत्रार्थः–** सूत्रेऽस्मिन् पदद्वयं विद्यते। सर्वः आदिः येषां तानि इति सर्वादीनि इति बहुव्रीहिसमासनिष्पन्नं प्रथमाबहुवचनान्तं संज्ञिपदम्। सर्वनामानि इति प्रथमाबहुवचनान्तं संज्ञापदम्। शब्दस्वरूपम् इत्यध्याह्रियते। ततश्च सर्वादीनि शब्दस्वरूपाणि सर्वनामसंज्ञकानि भवन्ति इति सूत्रार्थो लभ्यते। तदुक्तं दीक्षितेन – 'सर्वादीनि शब्दस्वरूपाणि सर्वनामसंज्ञानि स्युः' इति।

**सोदाहरणं व्याख्यानम्–** सर्व विश्व उभ उभय डतर डतम अन्य अन्यतर इतर त्व त्व नेम सम सिम। पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्। स्वमज्ञातिधनाख्यायाम्। अन्तरं

RNLKWC

बहिर्योगोपसंव्यानयोः। त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवतु किम् इति पञ्चत्रिंशत् शब्दाः सर्वादिगणे पठिताः। अतः प्रस्तुतसूत्रेण एतेषां सर्वनामसंज्ञा भवति।

ननु सर्वादीनि इत्यत्र बहुव्रीहिसमासः, बहुव्रीहिसमासश्च अन्यपदार्थे भवति इत्यतः सर्वशब्दस्य सर्वनामसंज्ञा न स्यात् इति चेन्न। द्विविधो हि बहुव्रीहिसमासः – तद्गुणसंविज्ञानबहुव्रीहिः, अतद्गुणसंविज्ञानबहुव्रीहिः चेति। तत्र तद्गुणसंविज्ञानबहुव्रीहौ वर्तिपदार्थस्य अपि बोधो भवति। सर्वादीनि इत्यत्र च तद्गुणसंविज्ञानबहुव्रीहिः वर्तते इत्यतः वर्तिपदार्थस्य सर्वशब्दस्यापि सर्वनामसंज्ञा स्यात्। एवं व्याख्यानस्वीकारे 'हलि सर्वेषाम्' इति सूत्रे सर्वेषाम् इति प्रयोगः प्रमाणम्। सर्वशब्दस्य सर्वनामत्वे एव सर्वेषाम् इत्यत्र सुडागमः भवति, अन्यथा रामाणाम् इव अत्रापि सर्वाणाम् इति प्रयोगः स्यात्।

सर्वादिगणपठितानां यथा सर्वनामसंज्ञा भवति तथा तदन्तानां सर्वादिशब्दान्तानाम् अपि इयं संज्ञा भवति। इदं च 'द्वन्द्वे च' इति सूत्रेण वर्णाश्रमेतराणाम् इत्यादिद्वन्द्वसमासे सर्वनामनिषेधात् ज्ञायते। तथाहि – इतरशब्दस्य सर्वादिगणे पाठात् तस्यैव सर्वनामसंज्ञा, वर्णाश्रमेतरशब्दस्तु गणे न पठितः अतः तस्य सर्वनामसंज्ञा न स्यात्। तथापि भगवान् पाणिनिः अत्र सर्वनामसंज्ञानिषेधार्थं 'द्वन्द्वे च' इति सूत्रं प्रणीतवान्। सूत्रप्रणयनेन आचार्यः अस्मान् बोधयति यत् सर्वनामशब्दान्तस्यापि इयं संज्ञा भवति इति। तेन 'परमसर्वत्र' इत्यत्र त्रल्-प्रत्ययःभवति। 'सप्तम्यास्त्रल्' इति सूत्रं हि सप्तम्यन्तात् सर्वनाम्न एव त्रल्-प्रत्ययं विदधाति। एवं 'परमभवकान्' इत्यत्र 'अव्ययसर्वनाम्नामकच् प्राक्टेः' इति सूत्रेण सर्वनाम्नः विधीयमानः अकच् अपि भवति।

सर्वनामसंज्ञा महासंज्ञा। तेन सर्वेषां नाम इति सर्वनाम इति अन्वर्थत्वं बुध्यते। तेन सर्वशब्दः यदा सर्वार्थस्य वाचकः भवति तदैव सर्वनामसंज्ञा भवति, परन्तु यदा कस्यचिद् व्यक्तिविशेषस्य नाम सर्वः भवति तदा तु सर्वशब्दस्य सर्वनामसंज्ञा न भवति। एवं यत्र सर्वनामशब्दः गुणीभूतः भवति तदापि न सर्वनामसंज्ञा। यथा सर्वम् अतिक्रान्तः इति अतिसर्वः इत्यत्रापि न सर्वनामसंज्ञा। अत्रापि अतिसर्वः कश्चिद् व्यक्तिविशेषं बोधयति न तु सर्वान्। अतः 'संज्ञोपसर्जनीभूतास्तु न सर्वादयः' इति वार्तिकम् अनपेक्षितम् इति बोध्यम्।

अधुना सर्वशब्दस्य प्रथमाबहुवचने सर्वनामप्रयुक्तविशेषकार्यार्थं सूत्रमवतारयति–

**४.२. जसः शी (७.१.१७)**

**अदन्तात्सर्वनाम्नः परस्य जसः शी स्यात्। अनेकाल्त्वात्सर्वादेशः। न च 'अर्वणस्तृ-' (सू. ३६४) इत्यादाविव 'नानुबन्धकृतमनेकाल्त्वम्' (प. ६) इति वाच्यम्। सर्वादेशत्वात् प्राग् इत्संज्ञाया एवाभावात्। सर्वे।**

**भूमिका–** वैयाकरणमूर्धन्येन भट्टोजिदीक्षितेन विरचिताया वैयाकरणसिद्धान्तकौमुद्याः अजन्तपुंलिङ्गप्रकरणे सूत्रमिदं वर्तते। षड्प्रकारकेषु सूत्रेषु इदं विधिसूत्रम्।

**सूत्रार्थः–** सूत्रेऽस्मिन् पदद्वयं विद्यते। जसः इति षष्ठ्येकवचनान्तं पदम्। शी इति प्रथमैकवचनान्तम्। 'सर्वनाम्नः स्मै' इति सूत्रात् सर्वनाम्नः इत्यनुवर्तते। 'अतो भिस ऐस्' इति सूत्रात् अतः इति। तच्च सर्वनाम्नः विशेषणं भवति इति तदन्तविधौ अदन्तात् इति लभ्यते। एवञ्च अदन्तात् सर्वनाम्नः इति लभ्यते। सर्वनाम्नः इति पञ्चमी वर्तते। अतः 'तस्मादित्युत्तरस्य' इति परिभाषया उत्तरस्य अर्थात् परस्य इति लभ्यते। ततः अदन्तात् सर्वनाम्नः परस्य इति आयातम्। जसः इत्यत्र षष्ठी वर्तते इत्यतः 'षष्ठी स्थानेयोगा' इति परिभाषया स्थाने इति लभ्यते। ततः साकल्येन अदन्तात् सर्वनाम्नः परस्य जसः स्थाने शी भवति इति अर्थः फलति। तदुक्तं दीक्षितेन– 'अदन्तात्सर्वनाम्नः परस्य जसः शी स्यात्' इति।

**उदाहरणं–** सर्वे इत्युदाहरणम्। साधनप्रक्रिया तावत्–

अव्युत्पन्नस्य सर्वशब्दस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इत्यनेन प्रातिपदिकसंज्ञायां 'ङ्याप्प्रातिपदिकात्' इत्यधिकृत्य 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रेण एकविंशतिप्रत्ययेषु प्राप्तेषु प्रथमायाः बहुवचनविवक्षायां 'बहुषु बहुवचनम्' इत्यनेन सूत्रेण जसि सर्व सर्व सर्व जस् इति स्थिते 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण सरूपाणाम् एकशेषे सर्व जस् इति स्थिते, 'चुटू' इत्यनेन सूत्रेण इत्संज्ञायां, जकारस्य 'तस्य लोपः' इत्यनेन लोपे, जस्प्रत्ययस्थस्यान्तिमसकारस्य 'हलन्त्यम्' इत्यनेन इत्संज्ञायां प्राप्तायां 'न विभक्तौ तुस्माः' इत्यनेन तन्निषेधे, सर्व अस् इत्यवस्थायां, 'सर्वादीनि सर्वनामानि' इति सूत्रेण सर्वनामसंज्ञायां, 'जसः शी' इत्यनेन अदन्तात् सर्वनाम्नः सर्वशब्दात् विहितस्य जसः स्थाने अनेकाल्त्वात् 'अनेकाल्शित्सर्वस्य' इत्यनया परिभाषया परिष्कृतेन शी इति सर्वादेशे सर्व शी इति जाते 'लशक्वतद्धिते' इत्यनेन इत्संज्ञायां शकारस्य 'तस्य लोपः' इत्यनेन सूत्रेण लोपे सर्व ई इति

जाते 'प्रथमयोः पूर्वसवर्णः' इत्यनेन पूर्वसवर्णदीर्घे प्राप्ते 'नादिचि' इत्यनेन तन्निषेधे 'आद्गुणः' इत्यनेन अकार-ईकारयोः स्थाने आन्तरतम्यात् एकारे गुणे **सर्वे** इति परिनिष्ठितं रूपं सम्पद्यते।

**व्याख्या–** 'अनेकाल्शित्सर्वस्य' इति परिभाषया जायमानः जसः स्थाने शी इति सर्वादेशः अनेकाल्त्वात् उत शित्त्वात् इति प्रश्नः। शित्त्वात् सर्वादेशः इति केचन वदन्ति। तेषाम् आशयः यत् 'नानुबन्धकृतमनेकाल्त्वम्' इति परिभाषा वर्तते। अर्थात् अनुबन्धः नाम इत् तत्प्रयुक्तम् अनेकाल्त्वं न भवति इति। शी इत्यत्र शकारस्य 'लशक्वतद्धिते' इति सूत्रेण इत्संज्ञा भवति। अतः इतं शकारम् आदाय शी इत्यत्र श्, ई इति अनेकाल् इति वक्तुं न शक्यते। अत एव 'अर्वणस्त्रसावनञः' इत्यत्र इतम् ऋकारम् आदाय अनेकाल् न भवति इत्यतः न सर्वादेशः। एवं च शकारस्य इत्संज्ञकत्वात् शित्त्वात् सर्वादेशः इति।

परन्तु इदं न युक्तम्। यतोहि 'लशक्वतद्धिते' इति सूत्रेण प्रत्ययादीनां लशकवर्गाणाम् इत्संज्ञा विधीयते। शी इति प्रत्ययाधिकारे न पठितः। अतः स साक्षात् न प्रत्ययः अपि तु जसः स्थाने आदेशभूतः स्थानिवद्भावेन प्रत्ययः भवति। एवञ्च यावत् न आदेशः तावत् न प्रत्ययः इति शकारस्य इत्संज्ञा अपि नास्ति। इत्संज्ञाभावात् च शकारम् ईकारम् आदाय भवत्येव अनेकाल्त्वम् इति अनेकाल्त्वात् एव सर्वादेशः। आदेशात् पूर्वं शकारस्य इत्संज्ञा न भवति इत्यतः शित्त्वम् एव न सिध्यति इति कुतः शित्त्वात् सर्वादेशः स्यात् इति बोध्यम्।

तत्र चतुर्थ्येकवचने सर्वनामप्रयुक्तविशेषकार्यं बोधयितुम् आह–

**४.३. सर्वनाम्नः स्मैः (७.१.१४)**

**अतस्सर्वनाम्नो ङे इत्यस्य स्मै स्यात्। सर्वस्मै।**

**भूमिका–** वैयाकरणमूर्धन्येन भट्टोजिदीक्षितेन विरचिताया वैयाकरणसिद्धान्तकौमुद्याः अजन्तपुंलिङ्गप्रकरणे सूत्रमिदं वर्तते। षड्विधेषु सूत्रेषु इदं विधिसूत्रम्।

**सूत्रार्थः–** सूत्रेऽस्मिन् पदद्वयं विद्यते। सर्वनाम्नः इति पञ्चम्येकवचनान्तं पदम्। स्मै इत्येकवचनान्तं पदम्। स्मै इत्यत्र विभक्तिलोपस्तु आर्षः। 'अतो भिस ऐस्' इति सूत्रात् अतः इत्यनुवर्तते। तच्च सर्वनाम्नः विशेषणम्। अतः तदन्तविधिः भवति। तेन अदन्तात् इति अर्थः भवति। 'ङेर्यः' इत्यत्र ङेः इति पदम् अत्र अनुवर्तते। ततः अदन्तात् सर्वनाम्नः ङेः स्मै इति लभ्यते। अत्र सर्वनाम्नः इति पञ्चमी। अतः

RNLKWC

‘तस्मादित्युत्तरस्य’ इति परिभाषया उत्तरस्य अर्थात् परस्य इति लभ्यते। एवं ङेः इति षष्ठ्यन्तम् इत्यतः ‘षष्ठी स्थानेयोगा’ इति परिभाषया स्थाने इति लभ्यते। ततः अदन्तात् सर्वनाम्नः परस्य ङेः स्थाने स्मै इत्यादेशः भवति इति सूत्रार्थः फलति। तदुक्तं दीक्षितेन– ‘अतस्सर्वनाम्नो ङे इत्यस्य स्मै स्यात्’ इति।

**व्याख्या–** अनेन सूत्रेण ङेः स्थाने स्मै इत्यादेशः विधीयते। तत्र स्मै इति अनेकाल् वर्तते। अतः ‘अनेकाल्शित्सर्वस्य’ इति परिभाषा प्रवर्तते। ततः स्मै इति सर्वादेशः इति विज्ञायते।

**उदाहरणं–** सर्वस्मै इत्युदाहरणम्। प्रक्रियामुखेन समन्वयः दर्श्यते–

प्रातिपदिकसंज्ञकात् सर्वशब्दात् चतुर्थ्येकवचने ङेप्रत्यये सर्व+ङे इति जाते ‘लशक्वतद्धिते’ इति सूत्रेण ङकारस्य इत्संज्ञायां ‘तस्य लोपः’ इति सूत्रेण तस्य लोपे सर्व+ए इति जाते ‘ङेर्यः’ इति सूत्रेण ङेप्रत्ययस्य स्थाने यकारादेशे प्राप्ते तं प्रबाध्य सर्वशब्दस्य ‘सर्वादीनि सर्वनामानि’ इति सूत्रेण सर्वनामसंज्ञकत्वात् अकारान्तत्वात् ‘सर्वनाम्नः स्मै’ इति सूत्रेण स्मै इत्यादेशे सर्व+स्मै इति जाते सम्मेलनेन **सर्वस्मै** इति रूपं सिद्धम्।

पञ्चम्येकवचने विशेषकार्यबोधनाय सूत्रान्तरम् अवतारयति–

**४.४. ङसिङ्योः स्मात्स्मिनौ (७.१.१५)**

**अतः सर्वनाम्न एतयोरेतौ स्तः। सर्वस्मात्।**

**भूमिका–** वैयाकरणमूर्धन्येन भट्टोजिदीक्षितेन विरचिताया वैयाकरणसिद्धान्तकौमुद्याः अजन्तपुंलिङ्गप्रकरणे सूत्रमिदं वर्तते। षड्प्रकारकेषु सूत्रेषु इदं विधिसूत्रम्।

**सूत्रार्थः–** सूत्रेऽस्मिन् पदद्वयं विद्यते। ङसिङ्योः इति षष्ठीद्विवचनान्तं पदम्। स्मात्स्मिनौ इति प्रथमाद्विवचनान्तं पदम्। ङसिः च ङिः च इति ङसिङी, तयोः ङसिङ्योः इति इतरेतरयोगद्वन्द्वसमासः। स्मात् च स्मिन् च इति स्मात्स्मिनौ इति इतरेतरयोगद्वन्द्वः। ‘सर्वनाम्नः स्मै’ इति सूत्रात् सर्वनाम्नः इत्यनुवर्तते। ‘अतो भिस ऐस्’ इति सूत्रात् अतः इत्यनुवर्तते। तच्च सर्वनाम्नः विशेषणम् इति तदन्तविधिः। ततः अदन्तात् सर्वनाम्नः इति लभ्यते। सर्वनाम्नः इत्यत्र पञ्चमी वर्तते इत्यतः ‘तस्मादित्युत्तरस्य’ इति परिभाषया उत्तरस्य इति लभ्यते, ङसिङ्योः इत्यत्र षष्ठी वर्तते इत्यतः ‘षष्ठी स्थानेयोगा’ इति स्थाने इति

लभ्यते। ततः अदन्तात् सर्वनाम्नः परयोः ङसिङ्योः स्थाने स्मात्स्मिनौ इत्यादेशौ स्तः इति सूत्रार्थः फलति। तदुक्तं दीक्षितेन– 'अतः सर्वनाम्न एतयोरेतौ स्तः' इति।

**व्याख्या–** अत्र द्वौ स्थानिनौ ङसिः ङिः च। द्वौ आदेशौ स्मात् स्मिन् च। अतः 'यथासंख्यमनुदेशः समानाम्' इति परिभाषया क्रमात् ङसिप्रत्ययस्य स्थाने स्मात् इत्यादेशः, एवं ङिप्रत्ययस्य स्थाने स्मिन् इत्यादेशः इति बुध्यते। अत्र स्मात्स्मिनौ इत्यादेशयोः अनेकाल्त्वात् 'अनेकाल्शित्सर्वस्य' इति परिभाषया सर्वदेशत्वम् एव इति बोध्यम्।

**उदाहरणं–** सर्वस्मात् इत्युदाहरणम्। प्रक्रियामुखेन सूत्रसमन्वयः प्रदर्श्यते–

प्रातिपदिकसंज्ञकात् सर्वशब्दात् पञ्चम्येकवचनविवक्षायां ङसिप्रत्यये सर्व+ङसि इति स्थिते अनुबन्धलोपे सर्व+अस् इति जाते 'टाङसिङसामिनात्स्याः' इति सूत्रेण आत् इत्यादेशे प्राप्ते तं प्रबाध्य सर्वशब्दस्य सर्वादिगणे पठितत्वात् 'सर्वादीनि सर्वनामानि' इति सूत्रेण सर्वनामसंज्ञकत्वात्, अकारान्तत्वात् च प्रस्तुतसूत्रेण स्मात् इति सर्वादेशे सर्वस्मात् इति रूपं सिद्धम्।

षष्ठीबहुवचने विशेषं प्रदर्शयति–

**४.५. आमि सर्वनाम्नः सुट् (७.१.५२)**

**अवर्णान्तात्परस्य सर्वनाम्नो विहितस्यामः सुडागमः स्यात्। एत्वषत्वे। सर्वेषाम्। सर्वस्मिन्। शेषं रामवत्।**

**भूमिका–** वैयाकरणमूर्धन्येन भट्टोजिदीक्षितेन विरचिताया वैयाकरणसिद्धान्तकौमुद्याः अजन्तपुंलिङ्गप्रकरणे सूत्रमिदं वर्तते। षड्प्रकारकेषु सूत्रेषु इदं विधिसूत्रम्।

**सूत्रार्थः–** सूत्रेऽस्मिन् पदत्रयं विद्यते। आमि इति सप्तम्येकवचनान्तं पदम्। सर्वनाम्नः इति पञ्चम्येकवचनान्तं पदम्। सुडिति प्रथमैकवचनान्तम्। 'अङ्गस्य' इत्यधिकारात् विभक्तिविपरिणामेन अङ्गात् इति लभ्यते। 'आज्जसेरसुक्' इति सूत्रात् आत् इत्यनुवर्तते। तच्च अङ्गात् इत्यस्य विशेषणम्। ततः तदन्तिविधिः। तेन अवर्णान्तात् अङ्गात् इति लभ्यते। सुट् इति टित् वर्तते। ततः आद्यन्तौ टकितौ इति परिभाषया सुडागमः आद्यावयवः भवति इति ज्ञायते। अधुना प्रश्नः कस्य आद्यावयवः भविष्यति इति। तत्र

अवर्णान्तात् अङ्गात् इत्यत्र पञ्चमी वर्तते इत्यतः 'तस्मादित्युत्तरस्य' इति परिभाषया परस्य सुट् इति ज्ञायते। आमि इत्यत्र सप्तमी वर्तते। अतः 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति पूर्वस्य सुट् इति ज्ञायते। एवं पूर्वस्य वा परस्य वा इति अनियमे प्राप्ते 'उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' इति पञ्चमीनिर्देशस्य बलवत्त्वम्। ततः अवर्णान्तात् अङ्गात् परस्य सुट् इति लभ्यते। ततः आमि इत्यस्य षष्ठ्यन्ततया विपरिणामः। एवञ्च अवर्णान्तात् अङ्गात् परस्य आमः सुट् आद्यावयवः भवति। अत्र 'सर्वनाम्नः स्मै' इत्यतः सर्वनाम्नः इत्यपि अनुवर्तते। ततः अवर्णान्तात् अङ्गात् परस्य सर्वनाम्नः विहितस्य आमः सुट् आद्यावयवः भवति इति सूत्रार्थः फलति। तदुक्तं दीक्षितेन– 'अवर्णान्तात्परस्य सर्वनाम्नो विहितस्यामः सुडागमः स्यात्' इति।

**सोदाहरणं व्याख्यानम्–** सर्वेषाम् इत्युदाहरणम्। प्रक्रियामुखेन सूत्रसमन्वयः तावत्–

प्रातिपदिकसंज्ञकात् सर्वशब्दात् षष्ठीबहुवचनविवक्षायाम् आम्प्रत्यये सर्व+आम् इति स्थिते मकारस्य हल्त्वात् 'हलन्त्यम्' इत्यनेन सूत्रेण इत्संज्ञायां प्राप्तायां 'न विभक्तौ तुस्माः' इत्यनेन तन्निषेध 'ह्रस्वनद्यापो नुट्' इति सूत्रेण नुडागमे प्राप्ते 'सर्वादीनि सर्वनामानि' इति सूत्रेण सर्वादिगणपठितस्य सर्वशब्दस्य सर्वनामसंज्ञकत्वात् अवर्णान्तत्वात् तं प्रबाध्य 'आद्यन्तौ टकितौ' इति परिभाषयासहायेन 'आमि सर्वनाम्नः सुट्' इत्यनेन सुटि अनुबन्धलोपे आद्यावयवे सर्व स् आम् इति जाते झल्परत्वात् 'बहुवचने झल्येत्' इत्यनेन सूत्रेण अजन्ताङ्गस्य एकारादेशे सर्वे साम् इति जाते 'आदेशप्रत्ययोः' इत्यनेन सूत्रेण सकारस्य मूर्धन्यषकारे सर्वेषाम् इति रूपं सिद्धम्।

सप्तम्येकवचने सर्वस्मिन् इति रूपं भवति। प्रातिपदिकसंज्ञकात् सर्वशब्दात् सप्तम्येकवचनविवक्षायां ङिप्रत्यये सर्व+ङि इति स्थिते अनुबन्धलोपे सर्व+इ इति जाते सर्वशब्दस्य सर्वादिगणे पठितत्वात् 'सर्वादीनि सर्वनामानि' इति सूत्रेण सर्वनामसंज्ञकत्वात्, अकारान्तत्वात् च 'ङसिङ्योः स्मात्स्मिनौ' इति सूत्रेण ङेः स्थाने स्मिन् इति सर्वादेशे सर्वस्मिन् इति रूपं सिद्धम्।

अवशिष्टं रूपं रामशब्दवत्। प्रक्रिया अपि रामशब्दवत्। अधस्तात् छात्राणां सुखबोधाय तेषां सिद्धिः प्रस्तूयते–

सर्वशब्दस्य प्रथमैकवचने सर्वः इति रूपम्। अव्युत्पन्नस्य सर्वशब्दस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इत्यनेन प्रातिपदिकसंज्ञायां 'ङ्याप्प्रातिपदिकात्' इत्यधिकृत्य

‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इति सूत्रेण एकविंशतिप्रत्ययेषु प्राप्तेषु प्रथमायाः एकवचनविवक्षायां ‘द्व्येकयोर्द्विचनैकवचने’ इत्यनेन सूत्रेण सुप्रत्यये सर्व+सु इति स्थिते, ‘उपदेशेऽजनुनासिक इत्’ इत्यनेन सूत्रेण उकारस्य इत्संज्ञायाम्, उकारस्य ‘तस्य लोपः’ इत्यनेन लोपे सर्व+स् इति जाते ‘सुप्तिङन्तं पदम्’ इति सूत्रेण तस्य पदसंज्ञायां, ‘ससजुषो रुः’ इति सूत्रेण सस्य रुत्वे सर्व+रु इति स्थिते ‘उपदेशेऽजनुनासिक इत्’ इति सूत्रेण रोः उकारस्य इत्संज्ञायां, ‘तस्य लोपः’ इति सूत्रेण लोपे सर्वर् इति जाते रेफोच्चारणात् परं वर्णोच्चारणाभावेन तदभावस्य ‘विरामोऽवसानम्’ इति सूत्रेण अवसानसंज्ञायाम्, अवसाने परे ‘खरवसानयोर्विसर्जनीयः’ इति सूत्रेण विसर्गे **सर्वः** इति रूपं सिद्धम्।

प्रथमायाः द्विवचने सर्वौ इति रूपं भवति। अव्युत्पन्नस्य सर्वशब्दस्य ‘अर्थवदधातुरप्रत्ययः प्रातिपदिकम्’ इत्यनेन प्रातिपदिकसंज्ञायां ‘ङ्याप्प्रातिपदिकात्’ इत्यधिकृत्य ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इति सूत्रेण एकविंशतिप्रत्ययेषु प्राप्तेषु प्रथमायाः द्विवचनविवक्षायां ‘द्व्येकयोर्द्विवचनैकवचने’ इत्यनेन सूत्रेण औप्रत्यये सर्व सर्व+औ इति स्थिते ‘सरूपाणामेकशेष एकविभक्तौ’ इति सूत्रेण सरूपाणाम् एकशेषे सर्व औ इति स्थिते ‘वृद्धिरेचि’ इत्यनेन वृद्धौ प्राप्तायां तं प्रबाध्य ‘प्रथमयोः पूर्वसवर्णः’ इत्यनेन पूर्वसवर्णदीर्घे प्राप्ते ‘नादिचि’ इत्यनेन पुनस्तन्निषेधे विहिते पुनः ‘वृद्धिरेचि’ इत्यनेन वृद्धौ एकादेशे कृते **सर्वौ** रूपं सिद्धम्।

सर्वशब्दस्य द्वितीयैकवचने सर्वम् इति रूपम्। अव्युत्पन्नस्य सर्वशब्दस्य प्रातिपदिकसंज्ञायां द्वितीयैकवचनविवक्षायां ‘द्व्येकयोर्द्विवचनैकवचने’ इत्यनेन अमि सर्व+अम् इति स्थिते मकारस्य ‘हलन्त्यम्’ इत्यनेन इत्संज्ञायां प्राप्तायाम्, ‘न विभक्तौ तुस्माः’ इत्यनेन निषेधे, सर्व+अम् इति जाते ‘अकः सवर्णे दीर्घः’ इत्यनेन सवर्णदीर्घे प्राप्ते तं बाधित्वा ‘अतो गुणे’ इत्यनेन पररूपे प्राप्ते, तं प्रबाध्य ‘प्रथमयोः पूर्वसवर्णः’ इत्यनेन पूर्वसवर्णदीर्घे प्राप्ते तमपि बाधित्वा ‘अमि पूर्वः’ इत्यनेन पूर्वरूपे **सर्वम्** इति रूपं सिद्धम्।

द्वितीयाद्विवचने सर्वौ इति रूपम्। प्रातिपदिकसंज्ञकात् सर्वशब्दात् द्वितीयाद्विवचनविवक्षायाम् औट्-प्रत्यये अनुबन्धलोपे ‘वृद्धिरेचि’ इति सूत्रेण वृद्धौ **सर्वौ** इति रूपं सिध्यति।

द्वितीयाबहुवचने सर्वान् इति रूपं सिद्धम्। प्रातिपदिकसंज्ञकात् सर्वशब्दात् द्वितीयाबहुवचनविवक्षायां शस्प्रत्यये सर्व+शस् इति जाते शकारस्य ‘लशक्वतद्धिते’ इति सूत्रेण इत्संज्ञायां ‘तस्य लोपः’ इति सूत्रेण

PNLKWC

तस्य लोपे सकारस्य 'हलन्त्यम्' इति इत्संज्ञायां प्राप्तायां 'न विभक्तौ तुस्माः' इति सूत्रेण तन्निषेधे सर्व+अस् इति स्थिते 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण पूर्वसवर्णदीर्घे सर्वास् इति जाते 'तस्माच्छसोः न पुंसि' इति सूत्रेण सकारस्य स्थाने नकारे कृते **सर्वान्** इति रूपं सिद्धम्।

तृतीयैकवचने सर्वेण इति रूपम्। प्रातिदिकसंज्ञकात् सर्वशब्दात् तृतीयैकवचनविवक्षायां टाप्रत्यये सर्व+टा इति स्थिते, 'चुटू' इति सूत्रेण टकारस्य इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण तस्य लोपे सर्व+आ इति जाते 'टाङसिङसामिनात्स्याः' इति सूत्रेण इनादेशे सर्व+इन इति जाते 'आद्गुणः' इति सूत्रेण गुणे सर्वेन इति स्थिते 'अट्कुप्वाङ्नुमव्यवायेऽपि' इति सूत्रेण नकारस्य णकारे **सर्वेण** इति रूपं सिद्धम्।

तृतीयाद्विवचने सर्वाभ्याम् इति रूपम्। प्रातिपदिकसंज्ञकात् सर्वशब्दात् तृतीयाद्विवचनविवक्षायां भ्याम्प्रत्यये सर्व+भ्याम् इति स्थिते 'सुपि च' इति सूत्रेण दीर्घे **सर्वाभ्याम्** इति रूपं सिध्यति।

तृतीयाबहुवचने सर्वैः इति रूपम्। प्रतिपदिकसंज्ञकात् सर्वशब्दात् तृतीयाबहुवचनविवक्षायां भिस्प्रत्यये सर्व+भिस् इति स्थिते 'अतो भिस ऐस्' इति सूत्रेण ऐसादेशे सर्व+ऐस् इति जाते 'वृद्धिरेचि' इति सूत्रेण वृद्धौ सर्वैस् इति स्थिते पदसंज्ञायां सस्य रुत्वे विसर्गे च कृते **सर्वैः** इति रूपं सिद्धम्।

चतुर्थीद्विवचने भ्याम्प्रत्यययोगे सर्वाभ्याम् इति रूपम्। प्रक्रिया तु तृतीयद्विवचनतुल्यत्वात् न पृथक् प्रदश्यर्ते।

चतुर्थीबहुवचने सर्वेभ्यः इति रूपम्। प्रातिपदिकसंज्ञकात् सर्वशब्दात् चतुर्थीबहुवचनविवक्षायां भ्यस्प्रत्यये सर्व+भ्यस् इति स्थिते 'सुपि च' इत्यनेन दीर्घे प्राप्ते तं प्रबाध्य 'बहुवचने झल्येत्' इति सूत्रेण एकारादेशे सर्वेभ्यस् इति जाते पदसंज्ञायां सस्य रुत्वे विसर्गे च कृते **सर्वेभ्यः** इति रूपम्।

पञ्चमीद्विवचने सर्वाभ्याम् इति रूपम्। तस्य प्रक्रिया पूर्वमेव प्रदर्शिता।

पञ्चमीबहुवचने सर्वेभ्यः इति रूपम्। तस्यापि प्रक्रिया दर्शिता।

षष्ठ्येकवचने सर्वस्य इति रूपम्। प्रातिपदिकसंज्ञकात् सर्वशब्दात् षष्ठ्येकवचनविवक्षायां ङस्प्रत्यये सर्व+ङस् इति जाते अनुबन्धलोपे सर्व+अस् इति जाते 'टाङसिङसामिनात्स्याः' इति सूत्रेण ङसः स्थाने स्य इति सर्वादेशे **सर्वस्य** इति रूपं सिध्यति।

RNLKWC

षष्ठीद्विवचने सर्वयोः इति रूपम्। प्रातिपदिकसंज्ञकात् सर्वशब्दात् षष्ठीद्विवचनविवक्षायाम् ओस्प्रत्यये सर्व+ओस् इति जाते 'ओसि च' इति सूत्रेण एकारादेशे सर्वे+ओस् इति जाते 'एचोऽयवायावः' इति सूत्रेण अयादेशे सर्वयोस् इति जाते पदसंज्ञायां सस्य रुत्वे विसर्गे च कृते **सर्वयोः** इति रूपम्।

सप्तमीद्विवचने सर्वयोः इति रूपम्। प्रक्रिया उपरिष्टाद् वर्णिता।

सप्तमीबहुवचने सर्वेषु इति रूपम्। प्रातिपदिकसंज्ञकात् सर्वशब्दात् सप्तमीबहुवचनविवक्षायां सुप्प्रत्यये सर्व+सुप् इति स्थिते पकारस्य 'हलन्त्यमि'त्यनेन इत्संज्ञायां 'तस्य लोपः' इत्यनेन लोपे सर्व+सु इति जाते 'बहुवचने झल्येत्' इत्यनेन सूत्रेण सर्व इत्यत्र मकारोत्तरस्याकारस्य एकारादेशे कृते सति सर्वे+सु इति जाते 'आदेशप्रत्यययोः' इत्यनेन सूत्रेण सकारस्य मूर्धन्यादेशे **सर्वेषु** इति रूपं सिद्धं भवति।

सर्वशब्दस्य समग्ररूपमाला इत्थं वर्तते–

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमा** | सर्वः | सर्वौ | सर्वे |
| **द्वितीया** | सर्वम् | सर्वौ | सर्वान् |
| **तृतीया** | सर्वेण | सर्वाभ्याम् | सर्वैः |
| **चतुर्थी** | सर्वस्मै | सर्वाभ्याम् | सर्वेभ्यः |
| **पञ्चमी** | सर्वस्मात् | सर्वाभ्याम् | सर्वेभ्यः |
| **षष्ठी** | सर्वस्य | सर्वयोः | सर्वेषाम् |
| **सप्तमी** | सर्वस्मिन् | सर्वयोः | सर्वेषु |

*******

## पाठगतलघुप्रश्नाः

१. सर्वनाम इति लघुसंज्ञा उत महासंज्ञा?

२. सर्वनामसंज्ञाविधायकं सूत्रं किम्?



RNLKWC

३. सर्वादीनि इत्यत्र कीदृशो बहुव्रीहिः?

४. अदन्तात् सर्वनाम्नः परस्य जसः स्थाने कः आदेशः भवति?

५. जसः स्थाने विधीयमानः आदेशः अन्त्यादेशः आहोस्वित् सर्वादेशः?

६. अनुबन्धकृतम् अनेकाल्त्वं न भवति इत्यर्थः कया परिभाषया बुध्यते?

७. अदन्तात्सर्वनाम्नः परस्य ङेप्रत्ययस्य स्थाने कः आदेशः भवति? केन सूत्रेण?

८. 'ङसिङ्योः स्मात्स्मिनौ' इति सूत्रस्य अर्थं लिखत।

९. ङसिङ्योः स्थाने क्रमात् स्मात्स्मिनौ स्तः इत्यत्र क्रमः कया परिभाषया बुध्यते?

१०. 'आमि सर्वनाम्नः सुट्' इति सूत्रस्य कः अर्थः?

११. 'आमि सर्वनाम्नः सुट्' इत्यत्र 'आमि' इत्यस्य विभक्तिवचनं लिखत।

१२. सुडागमः आद्यावयवः भवति आहोस्वित् अन्त्यावयवः?

## व्याख्यानात्मकप्रश्नाः

१. सर्वादीनि सर्वनामानि इति सूत्रं व्याख्यात।

२. जसः शी इति सूत्रं व्याख्यात।

३. सर्वनाम्नः स्मै इति सूत्रस्य व्याख्यानं कुरुत।

४. आमि सर्वनाम्नः सुट् इति सूत्रं व्याख्यायताम्।

५. रूपं साधयत– सर्वौ/सर्वे/सर्वान्/सर्वेण/सर्वैः/सर्वस्मै/सर्वस्मात्/सर्वेषाम्/सर्वस्मिन्।

**Suggested Books:**


1. भट्टोजिदीक्षितः। (१९६६)। वैयाकरणसिद्धान्तकौमुदी [लक्ष्मीव्याख्योपेता] (द्वितीयोंऽशः)। पञ्चोली, बालकृष्णशर्मा (सम्पा.)। वाराणसी : मोतीलाल बनारसीदास।
2. भट्टोजिदीक्षितः। (पुनर्मुद्रणम् २०१०)। वैयाकरणसिद्धान्तकौमुदी [बालमनोरमातत्त्वबोधिनीव्याख्याद्वयोपेता] (प्रथमो भागः)। शर्मा, गिरिधरः; शर्मा, परमेश्वरः (सम्पा.)। वाराणसी : मोतीलाल बनारसीदास।


RNLKWC